Roll No...........................
Signature of Invigilator .........

Paper Code
MV-105

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination Jan. – Feb -2022

**एम. ए. व्याकरण, प्रथमसत्रम्**
**व्याकरणम्, पञ्चम्पत्रम्**
**संस्कृतसाहित्यम्**

समयः - होरात्रयम् पूर्णाङ्काः 70

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

### (खण्ड -क)

प्र01. पृष्टेषु त्रिषु द्वयोः श्लोकयोः पूर्तिः करणीया। (5 x2 =10)

(1) समं सर्वेषु ...............................................................॥
(2) ध्यानेनात्मनि...............................................................॥
(3) ......................................... प्रकृतिरूच्यते .................॥

प्र02. पृष्टेषु त्रयाणां मध्ये द्वयोः व्याख्या लेखनीयाः। (2 x5 =10)

(1) सेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥
(2) उपद्रष्टानुमन्ता च भर्ता भोक्तामहेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥
(3) इच्छा द्वेषः सुखं दुःखं संघातश्चेतनाधृतिः।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्॥

### (खण्ड -ख)

प्र01. पृष्टेषु त्रिषु द्वयोः भावबोधनम्। (5 x2 =10)

(1) मैत्रेयीकात्यायन्योर् भावप्रसयोर् भेदं सविस्तरं वर्णयन्तु।
(2) भेददृष्टेः हानिं वर्णयन्तु। ब्रह्मतं परादाद् इत्यादिना मन्त्रेण।
(3) आत्मा वा अरे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि! अस्य व्याख्यां कुर्वन्तु।

प्र02. पृष्टेषु त्रिषु द्वयोः विषयात्मकप्रश्नयोः समाधानं कुरु। ( 5 x2 =10)

(1) याज्ञवल्क्यस्य गृहाद् पारिव्राज्यं सविस्तरं उपनिषद्रीत्या वर्णयन्तु।

(2) यत्र हि द्वैतमिवभवति तथा यत्र त्वस्य सर्वमात्मैवाभूत् तदा किं भवतिः।

(3) सैन्धवघनोदाहरणेन अनुच्छित्तिधर्माणम् आत्मानं वर्णयन्तु।

## (खण्ड -ग)

प्र01. पृष्टेषु पञ्चषु त्रयाणां समाधानं कुरु। ( 5 x3 =15)

(1) अधमं काव्यं सलक्षणं सोदाहणं च लिखन्तु।

(2) काव्यप्रकाशग्रन्थस्य मङ्गलाचरणं सश्लोकं वर्णयन्तु।

(3) 'वाक्यं रसात्मकं काव्यम्' इति केनोक्तं कश्चास्याभिप्रायः।

(4) काव्यस्य प्रयोजनं सश्लोकं वर्णयन्तु।

(5) काव्यस्य कारणं सश्लोकं वर्णयन्तु।

## (खण्ड -घ)

प्र01. पृष्टयोः द्वयोः एकस्य समाधानं कुरु। ( 5 x1 =5)

(1) अश्वघोषस्य जीवनविषये वर्णनं कुर्वन्तु।

(2) गौतमबुद्धस्य विशेषतां संक्षेपेण वर्णयन्तु।

प्र02. पृष्टेषु चतुर्षु द्वयोः पदपदार्थज्ञापनम् अलंकारछन्दोभिः सह कर्तव्यम्। ( 5 x2=10)

(1) विरेजुर्हरिणा यत्र सुप्ता मेध्यासुवेदिषु।
सलाजैर्माधवीपुष्पैरुपहाराः कृता इव॥

(2) सुवर्णस्तम्भवर्ष्माणः सिंहोरस्काः महाभुजाः।
पात्रं शब्दस्य महतः श्रियां च विनयस्य च॥

(3) यत्र स्म मीयते ब्रह्मकैश्चित् कैश्चित् न मीयते।
काले निमीयते सोमो न चाकाले प्रमीयते॥

(4) नीवारफलसन्तुष्टैः स्वस्थैः शान्तैरनुत्सुकैः।
आकीर्णोऽपि तपोभृद्भिः शून्यशून्य इवाभवत्॥

---------------x---------------